## ५७. क्षम्यताम्

इति

अग्रजा - हो, हो भवान् वा ? आगच्छतु, आगच्छतु ।

रविः - आम् अहमेव । मां कः ? इति चिन्तितवती भवती ?

अग्रजा - भवन्तं एकः महामार्जारः इति चिन्तितवती । निःशब्दं, अकस्मात् भवान् आगतवान् खलु ?

रविः - असत्यं मा वदतु भवती मां महाचोरः इति, अपरिचितः दृष्टः, इति, चिन्तितवती ननु ?

अग्रजा - नैव, भवन्तं महाव्याघ्रः इति चिन्तितवती ।

रविः - भोः तदर्थं कोपः मास्तु । अहमपि विनोदं कृतवान् । भवतु, सद्यः मां भवत्याः प्रियानुजः इति चिन्तयतु ।

अग्रजा - एवं विनोदशीलः इत्येव मम गृहे भवान् बहुप्रियः अभवत् परं भवतः अहङ्कारः, गर्वः,....

रविः - अग्रजे ! अद्य भवत्याः किम् अभवत् इति । पदे पदे कुपिता भवति खलु ?

अग्रजा - सत्यं भोः । अग्रजा इति, आवुत्तः इति वा भवतः प्रीतिः अस्ति वा ? एकं पत्रं लिखितवान् किम् ? अन्ततोगत्वा एकां दूरवाणीं ...........?

रविः - क्षम्यताम्... क्षम्याताम्.... पादयोः पतामि । आवुत्तः कदा आगच्छति ? भवती एव मां रक्षतु । भवतीं शरणं गच्छामि ।